# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.5.3.9** | समयः- 3 तः 6 |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – तत्त्वमुक्ताकलापः | |

### प्रथमान्वितिः (Unit 1)

**प्रश्न १ कस्याऽपि एकस्य उत्तरं लिखत।** ५

१ मङ्गलश्लोकं विलिख्य तद्व्याख्या यथाग्रन्थं विधेया।

२ तत्त्वज्ञानप्रयोजनं विशदव्याख्यया सह प्रतिपादयत।

**प्रश्न २ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ द्रव्याद्रव्यप्रभेदान् मितमुभयविधं तद्विदस्तत्वमाहुः
द्रव्यं द्वैधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ।
अन्त्यं प्रत्यक् प्राक् च प्रथममुभयधा तत्र जीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः॥
इत्यस्य व्याख्यानं सविशदं कुरुत।

२ पञ्चीकरणप्रक्रिया पाठ्यग्रन्थदिशा विविच्यताम्।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ कस्यचिदेकस्य व्याख्यात्मकम् उत्तरं लेख्यम्।** ५

१ देहादेः पाञ्चभौतिकत्वं यथाग्रन्थं संसाधयत।

२ क्षणिकत्वानुमाने प्रतिकूलतर्कं विशदयत।

**प्रश्न ४ कस्यचिदेकस्य सविस्तरम् उत्तरं लेख्यम्।** १०

१ सांख्यसम्मतसत्कार्यवादः निरसनीयः।

२ क्षणभंगवादिबौद्धमतं प्रतिपाद्य तन्निरासः स्वसिद्धान्तमनुसृत्य विधेयः।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनप्रश्नयोः कस्यचिदेकस्य व्याख्यात्मकमुत्तरं प्रदेयम्।** ५

१ कर्यकारणभावं यथासिद्धान्तं विशदीकुरुत।

२ इन्द्रियाणां सूक्ष्मत्वं संसाधयत।

**प्रश्न ६ कस्यचिदेकस्य विस्तारेण उत्तरं लेख्यम्।** १०

१ एकादशेन्द्रियाणां सिद्धिः विधेया ।

२ एकेन्द्रियवादनिरासो विधेयः।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्यचिदेकस्य उत्तरं लेख्यम्।** ५

१ प्राणस्यानिन्द्रियत्वं पाठ्यग्रन्थदिशा बोधयत।

२ तमसः पार्थिवत्वं यथाग्रन्थं प्रतिपादयत।

**प्रश्न ८ कस्यचिदेकस्य उत्तरं लिखत।** १०

१ कालस्योत्पत्तितः प्राक् परमपि च लयात् कालनास्तित्ववादी
स्वोक्तिव्याघातभग्नो न वदति यदि तत् को वदेत् कालसृष्टिम्।
आप्तस्तत्सृष्टिवादः तदुपधिपरिणत्यादिभिः सार्थकस्स्यात्
नो चेत् तत्रापि पूर्वापरवचनहतिः दुर्निवारप्रसंगाः॥
इत्यस्याः कारिकायाः तात्पर्यं प्रतिपादयत।

२ कालप्रत्यक्षत्वं यथासिद्धान्तं प्रतिपादयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ तत्त्वं कतिविधम्? किञ्च तत्?

२ को नाम विचारः?

३ महान् कतिधा उत्पद्यते?

४ त्रिविधोऽहंकारः कः?

५ इन्द्रियाणि कति सन्ति?

६ तन्मात्राणि कुत्र लीयन्ते?

७ पञ्चानां तन्मात्राणां कस्मादुत्पत्तिर्भवति?

८ कार्यकारणयोः भेदोऽस्त्युताभेदः?

९ नित्यैकान्तवादः कस्य मतमस्ति?

१० सर्वनित्यत्ववादी कः पक्षः?

११ तत्त्वमुक्ताकलापस्य रचयिता कः?

१२ जडद्रव्यसरे कति श्लोकाः सन्ति?

१३ तत्त्वमुक्ताकलापस्य सराः कति सन्ति?

१४ कस्य मते चित्ताख्यमन्तःकरणमस्ति?

१५ कालः स्वरूपतो नित्योऽनित्यो वा?